पुनरागत्य धरणीं चतुर्व्वेदी द्विजो भवेत् ॥
तत्र भुक्त्वा सुखं सर्व्वं शोकदुःखविवर्ज्जितः ।
पुनर्व्विष्णुपुरं गत्वा मोक्षं प्राप्नोत्यनुत्तमम् ॥
वीणां वादयते यस्तु पूजाकाले जगत्पतेः ।
पण्डितानामग्रणीः स्यात् प्रतिजन्मनि जन्मनि ॥
मृदङ्गवाद्यकृद्यस्तु पूजायां कैटभद्विषः ।
तस्य प्रसन्नो देवेशो ददात्यभिमतं फलम् ॥
डमरुं डिण्डिमञ्चैव झर्झरीं मधुरीं तथा ।
पटहं दुन्दुभिञ्चैव काहलं सिन्धुवादनम् ॥
कांस्यञ्च करतालञ्च वेणुं वादयते च यः ।
पूजाकाले महाविष्णोस्तस्य पुण्यं निशामय ॥
स्तेयाद्यैः पातकैर्म्मुक्तो मन्दिरं याति चक्रिणः ।
परमं स्थानमासाद्य तत्रैव परिमुच्यते ॥
करशब्दञ्च यः कुर्य्यात् पूजाकाले जगद्गुरोः ।
मुखवाद्यञ्च विप्रेन्द्र तस्य पुण्यं मयोच्यते ॥
कोटिकोटिकुलैर्युक्तः प्रयाति हरिमन्दिरम् ।
स्थानमासाद्य तत्रैव मोक्षमक्षयमाप्नुयात् ॥
विष्णोरायतने यस्तु भक्तियुक्तः प्रनृत्यति ।
स याति ब्राह्मणश्रेष्ठ तद्विष्णोः परमं पदम् ॥
यस्तु गायति गीतानि भक्त्या नारायणाग्रतः ।
स नर्त्तकत्वमाप्नोति गन्धर्व्वाणां पुरेषु च ॥
स्तौति स्तोत्रं जगन्नाथं यो भक्त्या वैष्णवो जनः ।
तस्य प्रसन्नो भगवान् सर्व्वान् कामान् प्रयच्छति ॥
मासे मासे हरिं यस्तु विधिनानेन पूजयेत् ।
अचिरेणैव विप्रर्षे प्रसादयति सोऽच्युतम् ॥
जगदुदधिमिमं ये तर्त्तुमिच्छन्ति मर्त्त्याः
प्रचुरतरगभीरं सर्व्वदुःखप्रदञ्च ।
परमपुरुषपादाम्भोजयुग्मं मनोज्ञं
त्रिदशनिवहसेव्यं ते तु सर्व्वे यजन्तु ॥”

इति पाद्मे क्रियायोगसारे १३ अध्यायः ॥*॥

अथ द्वात्रिंशत् सेवापराधाः । भगवद्भक्तानां क्षत्त्रियसिद्धान्नभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वास्नात्वा विष्णोरुपसर्पणम् ३ मृतं नरं स्पृष्ट्वास्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा विष्णुगृहप्रवेशनम् ५ मानवं शवं स्पृष्ट्वास्नात्वा विष्णुसन्निधावस्थानम् ६ विष्णुं स्पृशतः पायुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्व्वतः पुरीषत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपसर्पणम् ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ क्रुद्धस्य विष्णुस्पर्शनम् १३ निषिद्धपुष्पेण विष्ण्वर्च्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोश्च स्पर्शनम् १६ कृष्णवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्धृतवासः परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० हंसजालपदसरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य विष्णोः स्पर्शनं कर्म्मकरणं वा २२ श्मशानं गत्वास्नात्वा विष्णूपसर्पणम् २३ पिण्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय पीत्वा वा स्पृष्ट्वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पेऽप्रदाय धूपदीपदानम् २९ उपानद्भ्यावारुह्य विष्णुस्थानप्रवेशनम् ३० भेरीशब्देन विना विष्णुप्रबोधनम् ३१ अजीर्णे सति विष्णुस्पर्शनम् ३२ । एतदुपलक्षणम् । इत्याह्निकाचारतत्त्वम् ॥*॥ अपि च ।

धरण्युवाच ।

“तवापराधात् देवेश वर्ज्यान् यान् वैष्णवेन च ।
निरापराधो मनुजः सापराधश्च जायते ॥
कर्म्मणाचरणे येन करणेन जुगुप्सितम् ।
तच्च पूजाफलं सर्व्वं जायते तद्वदस्व मे ॥

वराह उवाच ।

कर्म्मणा मनसा वाचा ये पापरुचयो जनाः ।
भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम् ॥
मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेव च ।
सूतक्युदक्याः क्षपणं स्पर्शनं मेहनं तथा ॥
अभाष्यभाषणं कोपं पिण्याकस्य च भक्षणम् ।
रक्तपारक्यमलिनं वस्त्रधारित्वनीलिजम् ॥
गुरोश्चालीकनिर्ब्बन्धं पतितान्नस्य भक्षणम् ।
अभक्ष्यभक्षणञ्चैव तण्डुलीयविभीतकम् ॥
अदानं तु वरान्नस्य जालपादवराकयोः ।
भजनं देवतागारे सोपानत्कोपसर्पणम् ॥
तथैव देवपूजायां निषिद्धकुसुमार्च्चनम् ।
अनुत्तार्य्य च निर्म्माल्यं पूजा जीर्णान्धकारयोः ॥
पानं सुराया देवस्य अन्धकारे प्रबोधनम् ।
वातकर्म्मार्च्चने विष्णोरनमस्करणं तथा ॥
अपराधास्त्रयस्त्रिंशत् समाख्याता मया धरे ।
एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपश्यति ॥
दूरस्थो न नमस्कारं कुर्य्यात् पूजा तु राक्षसी ॥”

तत्प्रायश्चित्तं यथा,—

“एकरात्रं द्विरात्रं वा त्रिरात्रं स्नानमेव च ।
सवासाः पञ्चगव्याशी सलवस्त्रान्तिकं क्रमात् ॥
नीलीरङ्गापनोदार्थं गोमयेन प्रघर्षणम् ।
प्राजापत्येन शुद्धिः स्यात् नीलीवस्त्रस्य धारणात् ।
चान्द्रायणद्वयं कुर्य्यात् गुरोः क्षमितमुत्तमम् ।
चान्द्रायणं पराकञ्च पतितान्नस्य भक्षणात् ॥
चान्द्रायणं पराकञ्च प्राजापत्यं तथैव च ।
गोप्रदानञ्च भोज्यञ्च अभक्ष्यस्य च भक्षणे ॥
उपवासस्तु पञ्चाहं पञ्चगव्येन शुध्यति ।
सोपानत्कश्चरेत् पादं कृच्छस्य द्विरभोजनम् ॥
पुष्पाभावेऽर्च्चनं स्नानं देवस्पर्शञ्च कारयेत् ।
अनिर्म्माल्ये नमस्कारं स्नानं पञ्चामृतेन तु ॥
सुरापाने द्विजातीनां चान्द्रायणचतुष्टयम् ।
तथैव द्वादशाष्टौ तु प्राजापत्यत्रयं चरेत् ॥
ब्रह्मकूर्च्चेन शुद्धिः स्यात् गोप्रदानत्रयेण च ।
त्रयाणामेकरात्रेण पञ्चामृतनिषेवणात् ॥
मुच्यते त्वपराधैस्तु तथा विष्णोः स्तवं पठन् ।
एतत्ते कथितं गुह्यं किमन्यत् श्रोतुमिच्छसि ॥

धरण्युवाच ।

अस्ति कश्चिदुपायोऽत्र येन त्वं नृप तुष्यसि ।
पूजितः सफलश्चासि अपराधविशोधनः ॥

वराह उवाच ।

संवत्सरस्य मध्ये तु तीर्थे सौकरवे मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ।
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ॥
अनयोस्तीर्थयोरेव यः सेवेत सकृन्नरः ।
सहस्रजन्मजनि तानपराधान् जहाति सः ।
स्नानात् पानात् तथा ध्यानात् कीर्त्तनाद्धारणात्तथा ।
श्रवणान्मननाच्चैव दर्शनाद् याति पातकम् ॥

इति वाराहपुराणे अपराधप्रायश्चित्तनामाध्यायः ॥

सेवि, क्ली, ( सेव्यते लोकैरिति । सेव + इन् । ) फलविशेषः । सेश्रो इति हिन्दी भाषा । तत्पर्य्यायः । वदरम् २ सिञ्चितिकाफलम् ३ मुष्टिप्रमाणम् ४ सेवितम् ५ सेवम् ६ । अस्य गुणाः । वातपित्तहरत्वम् । गुरुत्वम् । बृंहणत्वम् । कफकरत्वम् । हृद्यत्वम् । पाके स्वादुरसत्वम् । हितत्वञ्च । इति राजनिर्घण्टः ॥

सेविका, स्त्री, मिष्टान्नविशेषः । सेश्रोयाञ्जि इति भाषा । यथा,—

“समितावर्त्तिकाः कृत्वा सुसूक्ष्मा यवसन्निभाः ।
शुष्काः क्षीरेण संसाध्या भोज्या घृतसितान्विताः ॥”

अस्या गुणाः ।

“सेविका तर्पणी बल्या गुर्व्वी पित्तानिलापहा
ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रया”

इति भावप्रकाशः ॥

( दासी । भुजिष्या । इति केचित् ॥ )

सेवितः, त्रि, (सेव + क्तः ।) समुपासितगुर्व्वादिः । तत्पर्य्यायः । वरिवसितः २ वरिवस्यितः ३ उपासितः ४ उपचरितः ५ । इति शब्दरत्नावली ॥ आराधितः । उपभुक्तः । आश्रितः । इति सेवधात्वर्थदर्शनात् ॥ (यथा, महाभारते । १ । १७ । ६ ।

“काञ्चनाभरणं चित्रं देवगन्धर्व्वसेवितम् ॥”)

सेविफले, क्ली । इति राजनिर्घण्टः ॥

सेव्यं, क्ली, (सेव्यते इति । सेव + ण्यत् ।) वीरणमूलम् । इत्यमरः । २ । ४ । १६४ ॥ ( अस्य पर्य्यायो यथा,—

“वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि ॥”

इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥

लामज्जकम् । उशीरवत्पीतच्छविलतृणविशेषः । तत्पर्य्यायो यथा,—

“लामज्जकं सुनालं स्यादमृणालं लयं लघुः ।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥”

इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥